# U.G. 6th Semester Examination - 2023

# SANSKRIT

## [HONOURS]

## Course Code : SANS-H-CC-T-14

Full Marks : 60 Time : $2\frac{1}{2}$ Hours

*The figures in the right-hand margin indicate marks. Candidates are required to give their answers in their own words as far as practicable.*

1. Answer any **ten** questions in Sanskrit Language with Devanāgari Script: 10×2=20

निम्नोक्तेषु **दश** प्रश्नान् सुरगिरा देवनागरीलिप्या च समाधेया :

a) महाभारतस्य प्रणेता क: ? श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि विद्यते ?

b) तमोगुण: कस्मात् जायते ? तमसि विवृद्धौ के जायन्ते ?

c) प्रमाथीनि इन्द्रियाणि कस्य मन: प्रसभं हरन्ति ?

d) सत्त्वगुणस्य स्वरूपं वर्ण्यताम्।

e) नरकस्य द्वाराणि कतिविधानि ? कानि च तानि ?

f) श्रीमद्भगवद्गीतानुसारेण मनस: स्वरूपं कीदृशं भवति ?

g) कीदृशा: आहारा: सात्विकप्रिया: ?

[Turn Over]

h) व्यवसायात्मिका अव्यवसायात्मिका च बुद्धि: कीदृशा: ?

i) किमर्थं अर्जुन: पूर्वजन्मन: वृत्तान्तं स्मर्तुं न शक्नोति?

j) इह जगति केन सदृशं पवित्रं न विद्यते? तत् केन प्राप्यते?

k) 'यत्तपस्यसि कौन्तेय:'......कौन्तेय: इति पदेन क: सम्बोधित: ? तस्य एवंविधस्य नाम्न: किं कारणम्?

l) वह्नि: आदर्शश्च केन आव्रियते?

m) श्रीमद्भगवद्गीताया: प्रसिद्धयो: द्वयो: टीकाकारयो: नाम उल्लिख्यताम्?

n) व्युत्पत्तिनिर्देशं कुरु—धार्तराष्ट्रा: जिजीविषाम:।

o) शून्यस्थलं पूर्णं कुरु:

i) स्थितप्रज्ञस्य का ________ समाधिस्थस्य केशव।

ii) ________ कौन्तेय दुष्पूरणानलेन च।

2. Answer any **four** of the following questions: 4×5=20

अधोधृतेषु प्रश्नेषु यथेच्छं **चत्वार:** समाधेया:।

a) Translate into Bengali or English:

i) क्लैव्यं मास्म गम: पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप।।

**OR**

ii) योगस्थ: कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्यो: समो भूत्वा समत्वं योग उच्यते।।



b) Write short notes on any **two** of the following: $2\times2\frac{1}{2}=5$

i) रजोगुण:

ii) धर्मक्षेत्र:

iii) वार्ष्णेय:

iv) तामसिक: आहार:

c) 'छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत...' कस्य वाक्यमिदं? 'भारत' इति पदेन क: सम्बोधित:? 'भारत' पदस्य व्युत्पत्ति:निर्णीयताम्? केन अज्ञानसम्भूतं संशयं छित्त्वा योगमातिष्ठति?

d) केन कथं कुत्र ज्ञानं लभते?

e) श्रीमद्भगवद्गीतानुसारं ईश्वरे सर्वकर्मार्पणम् इति तत्त्वं व्याख्यायताम्।

f) भगवद्गीताया: षष्ठाध्यायानुसारेण योगी कीदृशं आसनं देशं शरीरञ्च धारयन् योगं युञ्जात्?

g) ''आत्मन्येवात्मना तुष्ट: स्थितप्रज्ञस्तदोच्यते''—अत्र उल्लिखितस्य स्थितप्रज्ञशब्दस्य व्याख्या कार्या।

3. Answer any **two** of the following questions. One must be written in Sanskrit Language with Devanāgari Script: 2×10=20

अधोलिखितेषु प्रश्नेषु यथेच्छं प्रश्न**द्वय**मुत्तरता तयोरेकमवश्यं संस्कृतेन देवनागरीलिप्या च लेख्यम् :

a) श्रीमद्भगवद्गीताया: सात्त्विकी-राजसी-तामसी-बुद्धे: स्वरूपं प्रदर्शय?

b) श्रीमद्भगवद्गीतायाः सप्तदशाध्यायानुसारेण तपसः भेदं प्रदर्श्य तेषां स्वरूपं विव्रियताम्?

c) श्रीमद्भगवद्गीतायाः द्वादशाध्यायानुसारेण क एव भगवतः प्रियः? आलोच्यताम्।

d) Explain in Sanskrit with Devanāgari Script :

i) इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि।।

**OR**

ii) इन्द्रियाणि पराण्याहरिन्द्रियेभ्यः परंमनः।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः।।

---